# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा - मार्च/एप्रिल - २०२०

| | | |
|---|---|---|
| कक्षा-शास्त्री-२ | प्रश्नपत्रम् – ४ | गुणाः – ७० |
| विषयः – प्राच्यार्थशास्त्रम् एवं राजनीतिशास्त्रम् | सत्रम्- ४ (चतुर्थीयम्) | समयः- ११:० तः ०२:३० |
| दिनाङ्कः – ३०/०३/२०२० | सन्दर्भग्रन्थः – कौटिल्यार्थशास्त्रम् | |

---

**प्रथमान्वितिः (Unit 1)** गुणाः

**प्रश्नः १ द्वयोः ससन्दर्भं व्याख्यां कुरुत।** १०

१ कोशमूलो हि दण्डः। कोशाभावे दण्डः परं गच्छति, स्वामिनं वा हन्ति। सर्वाभियोगकरश्च कोशो धर्महेतुः।

२ रूयोस्तु व्यसने तुल्ये विशेषो गुणतः क्षयात्।
शेषप्रकृतिसाद्गुण्यं यदिस्यान्नाभिधेयकम्।

३ व्याधितो राजा यथा प्रवृत्तं राजप्रणिधिमनुवर्तयति। नवस्तु राजा बलवर्जितं ममेदं राज्यम् इति यथेष्टमनवग्रहश्चरति।

**प्रश्नः २ प्रदत्ताभ्यां प्रश्नाभ्यां कस्यचिदेकस्य सविस्तरमुत्तरं लिखत।** १०

१ सामान्यपुरुषाणां व्यसनानि सविस्तारं वर्णयत।

२ कोषसंवर्गं विस्तारपूर्वकं लिखत।

**द्वितीयान्वितिः (Unit 2)**

**प्रश्नः ३ कयोश्चिद् द्वयोः ससन्दर्भं व्याख्यां कुरुत।** १०

१ नेति कौटिल्यः। प्रभाववानुत्साहवन्तं राजानं प्रभावेणातिसन्धत्ते। तद्विशिष्टमन्यं राजानमावाह्य हृत्वा क्रीत्वा प्रवीरपुरुषान्।

२ देशः पृथिवी। तस्यां हिमवत्समुद्रान्तरमुदीचीनं योजनसहस्रपरिमाणं तिर्यक् चक्रवर्तिक्षेत्रम्।

३ मार्गदेशिकं परभूमियोग्यमरियुद्धप्रतिलोममटवीबलप्रायः शत्रुर्वा बिल्वं बिल्वेन हन्यताम् अल्पः प्रसारो हन्तव्यः इत्यटवीबलकालः।

**प्रश्नः ४ कस्याप्येकस्य सविस्तारम् उत्तरं यच्छत।** १०

१ क्षयव्ययलाभविचारान् प्रतिपादयत।

२ बाह्य-आभ्यान्तर-आपत्तीः सविस्तरं वर्णयत।

## तृतीयान्वितिः (Unit 3)

**प्रश्नः ५ प्रदत्तेभ्यः श्लोकेभ्यः द्वयोः ससन्दर्भं व्याख्यां कुरुत।** १०

१ मध्यमस्योत्तरे नवभागे राजवास्तुकं धनुःशतायाममर्धविस्तारं पश्चिमार्धे तस्यान्तः पुरम्। अन्तर्वंशिकसैन्यं चान्ते निविशेत।

२ पार्वतं वनदुर्गं वा सापसारप्रतिहत्।
स्वभूमौ पृष्ठतः कृत्वा युध्येत निविशेत च।।

३ नवं शरावं सलिलस्य पूर्णं सुसंस्कृतं दर्भकृतोत्तरीयम्।
तत्तस्य मा भून्नरकं च गच्छेद्यो भर्तृपिण्डस्य कृते न युध्येत्।।

**प्रश्नः ६ प्रदत्तभ्यां प्रश्नाभ्याम् एकस्य सविस्तरम् उत्तरं लिखत।** १०

१ स्कन्धावारनिवेशं यथाग्रन्थं लिखत

२ कूटयुद्धविकल्पान् वर्णयत।

## चतुर्थान्वितिः (Unit 4)

**प्रश्नः ७ प्रदत्तेभ्य प्रश्नेभ्यः दशप्रश्नानां लघूत्तराणि ददत।** १०

१ व्यसनाधिकरणस्य प्रथमाध्यास्य नाम किम्?

२ अमात्यमूलाः के सन्ति?

३ अष्टमाधिकरणस्य द्वितीयाध्यायस्य नाम किम्?

४ पुरुषव्यसनवर्गः कस्मिन् अधिकरणे आयाति?

५ देशकालानां तु का श्रेयसी?

६ कः पुरुषः व्यसनी भवति?

७ नवमाधिकरणस्य द्वितीयाध्यायस्य नाम किम्?

८ अभियास्यत्कर्म कस्याधिकरणस्य नाम अस्ति?

९ के परस्परसाधकाः भवन्ति?

१० दशमाधिकरणस्य नाम किम्?

११ समन्ततः आक्रमणसंभावनायां किं व्यूहमुचितं भवति?

१२ स्वसैन्योत्साहनं कस्मिन् अधिकरणे वर्तते?

१३ दशमाधिकरणस्य चतुर्थाध्यायस्य नाम किम्?

१४ अन्यदेशस्योपरि स्वसैन्यव्यायामयोग्यः परस्यायोग्यः आक्रमणकालः कः?

१५ संग्रामस्तु निर्दिष्टदेशकालः कः?

**************************